Shodhshauryam, International Scientific Refereed Research Journal
© 2022 SHISRRJ | Volume 5 | Issue 6 | ISSN : 2581- 6306

# पाणिनीयकाशकृत्स्नधातुपाठयोः अदादिजुहोत्यादिगणधातूनां तुलना

**कोङ्क कुमारस्वामि**

**शोधच्छात्रः, व्याकरणविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः**

Email- kumaraswamykumi@gmail.com

**सारांशः** - संस्कृतजगति लौकिकवैदिकशब्दानामनुगुणं तत्तद्व्याकरणधातुपाठादयोश्च तत्तत्कालेषु प्रसिद्धाः जाताः। सर्वान्ते पाणिनीयव्याकरणम्, धातुपाठश्च सर्वसम्मतत्वेन विराजेते। पाणिनीयधातुपाठात् पूर्वमपि स्थितेषु धातुपाठेषु काशकृत्स्नधातुपाठः अन्यतमः। एतयोस्तुलनया ज्ञायन्ते प्रयुक्ताः तत्तत्कालिकलौकिकधातवः। अतोऽत्र पाणिनीयकाशकृत्स्नधातुपाठयोः अदादिजुहोत्यादिगण धातूनां तुलनात्र विहिता। वस्तुतः पाणिनीयधातुपाठे अदादिगणः, जुहोत्यादिगणः पाथक्येन पठितः, काशकृत्स्नधातुपाठे तु जुहोत्यादिगणः अदादिगणान्तर्भूतो वर्तते । अत्र अदादिजुहोत्यादिगणधातुनां तुलनां कृत्वा ईषत्समानाः धातवः इति विभज्य तत्रस्थानां धातूनां मूलधात्वर्थनिर्देशानुबन्धवर्ण- वर्तमानकालिकरूपादिषु भेदाः सविवरणं स्पष्टीकृताः। ततः परं केवलं काशकृत्स्नधातुपाठे एव पठिताः धातवः काशकृत्स्नधातुव्याख्यानुगुणं व्याख्याताः। अवशिष्टाः धातवः मूलधात्वर्थनिर्देशवर्तमानकालिकरूपदृष्ट्या समानास्सन्ति।

**विशेषशब्दाः** – मूलधातुः, धात्वर्थनिर्देशः, वर्तमानकालिकरूपम्, अनुबन्धवर्णः, अदादिगणः, जुहोत्यादिगणः, काशकृत्स्नधातुव्याख्यानम्, ईषत्समानाः धातवः, केवलकाशकृत्स्नधातवः, विविधधातव इत्यादयः।

---

**प्रस्तावना** – प्राचीनेऽस्मिन् व्याकरणशास्त्रे बहूनामाचार्याणां योगदानं समुपलभ्यते। इदं हि व्याकरणशास्त्रं अनेकप्रकारकम्। श्रीतत्त्वनिधिनामके वैष्णवग्रन्थे नव-व्याकरणानि प्रदर्शिषतानि ।

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**

**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम् ।।**[1] इति

पाणिनीयव्याकरणधातुपाठाभ्याम् केषुचिद्विषयेषु अन्यव्याकरणधातुपाठाः साम्यं, वैभिन्नयं वा भजन्ते। इदं तु तेषां तुलनया सञ्ज्ञायते। अत पाणिनीयकाशकृत्स्नधातुपाठयोर्विषये तुलनया सामानासमानविचारोऽत्र यथामति प्रस्तूयते।

- **उद्देश्यम्** - विविधधातुपाठानां तुलनया तत्तत्कालिकधातूपयोगविधिः, धातुभेदाः, नूतनधातूनां ज्ञानं, काले काले च परिवर्तनपद्धतिः इत्यादीनां विशिष्टज्ञानम्।
- **विषयः** – पाणिनीयधातुपाठस्य, काशकृत्स्नधातुपाठस्य च अदादिजुहोत्यादिगणधातून् सुष्ठु तुलनां कृत्वा विभागद्वयं कृतम्।

---

1 सं.व्या.शा.इ.पृ-78

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

1. पाणिनीयकाशकृत्स्नधातुपाठयोः अदादिजुहोत्यादिगणीयाः ईषत्समानाः धातवः।
2. केवलकाशकृत्स्नीयाः अदादिजुहोत्यादिगणधातवः। इति

पाणिनीयधातुपाठे अदादिगणः, जुहोत्यादिगणः पाथक्येन पठितः। किन्तु काशकृत्स्नधातुपाठस्य व्याख्यारूपे काशकृत्स्नधातुव्याख्याने जुहोत्यादिगणः अदादिगणान्तर्भूतो वर्तते, अर्थात् जुहोत्यादिगणधातवोऽपि अदादिगणधातुष्वेव पठ्यन्ते इति। अदादिजुहोत्यादिगणधातुषु ईषत्समानधातवः, केवलकाशकृत्स्नधातवश्च सविवरणं विचार्यन्ते। कृतपूर्वविभागानुसारमधुना विचार्यते।

**1. पाणिनीयकाशकृत्स्नधातुपाठयोः अदादिजुहोत्यादिगणीयाः ईषत्समानाः धातवः**

**1.1. अदादिगणः**

(प्रथमं काशकृत्स्नधातुं दत्वा ततः पाणिनीयधातुर्दीयते)

**2.8. क्ष्णु तेजने(अणिकरणे) - क्ष्णौति=अणिं करोति। 2.32 क्ष्णु तेजने- क्ष्णौति।**

पाणिनीयधातुपाठे क्ष्णु तेजने इति धातुना क्ष्णौति इति रूपं भवति। काशकृत्स्नधातुव्याख्याने तु क्ष्णु तेजने इति धातुं पठित्वा क्षौति इति रूपमपठत्। तत्रैव व्याख्याने क्ष्ण्वन्, क्षवकः, क्ष्णुत् इति रूपाणि दत्तानि। द्वयोर्धात्वोः वर्तमानकालिकरूपे (क्ष्णौति – क्षौति) इति भेदो लोक्यते।

**2.10.रु शब्दे - रौति=भर्त्सयति। 2.28 रु शब्दे- रौति,रवीति।**

पाणिनीयधातुपाठे रु शब्दे इति धातुना रौति,रवीति इति रूपद्वयं भवति। अत्र **तुरुस्तुशम्यमः सार्वधातुके** [2] इति सूत्रेण सार्वधातुकस्य हलादेः तिङः ईट् वा स्यात्। तेन रवीति इति रूपं सम्पद्यते, ईडभावेपक्षे तु रौति इति। काशकृत्स्नधातुव्याख्याने तु रु शब्दे इति धातुं पठित्वा रौति इत्येव रूपमपठत्।

**2.11. षु प्रसवे - सौति=गर्भं विमुञ्चति। 2.36 षु प्रसवैश्वर्ययोः- सौति।**

अत्र द्वयोर्धातुपाठयोः धात्वोः मूलधात्वर्थनिर्देशवर्तमानकालिकरूपञ्च समानञ्चेदपि पाणिनीयधातुपाठे धातोः ऐश्वर्ये इत्यधिकार्थो निर्दिष्टः।

**2.14. वी प्रजनकान्त्यासनखादनेषु च - वेति=प्रसूते।**

**2.43 वी गतिप्रजनकान्त्यासनखादनेषु- वेति।**

अत्र द्वयोर्धातुपाठयोः धात्वोः मूलधात्वर्थनिर्देशवर्तमानकालिकरूपञ्च समानञ्चेदपि पाणिनीयधातुपाठे धातोः गतौ इत्यधिकार्थो निर्दिष्टः।

**2.19. श्रा पाके – श्राति,श्रपयति=पचति। 2.48 श्रा पाके – श्राति।**

2 अष्टा.7.3.95

पाणिनीयधातुपाठे श्रा पाके इति धातुना श्राति इति रूपं भवति। काशकृत्स्नधातुव्याख्याने तु श्रा पाके इति धातुं पठित्वा श्राति,श्रपयति इति रूपद्वयमपठत्। अत्र घटादित्वात् मित्वमिति हेतोः श्रपयति इति रूपमदादिति। पाणिनीयेऽपि घटादित्वात् मित्त्वम्, तेन श्रपयति, अन्यत्र तु श्रापयति इत्यर्थः।

**2.22. रा आदाने - राति=गृह्णाति।** **2.52 रा दाने आदाने – राति।**

**2.22.ला आदाने - लाति=गृह्णाति।** **2.53 ला आदाने दाने – लाति।**

अत्र द्वयोर्धातुपाठयोः धात्वोः मूलधात्वर्थनिर्देशवर्तमानकालिकरूपञ्च समानञ्चेदपि पाणिनीयधातुपाठे धातोः दाने इत्यधिकार्थो निर्दिष्टः।

**2.29. मृजुष् शुद्धौ - मार्ष्टि=शुद्धं करोति।** **2.61 (मृजू) मृजुष् शुद्धौ – मार्ष्टि।**

पाणिनीयधातुपाठे मृजूष् शुद्धौ इति धातुना मार्ष्टि इति रूपं भवति। काशकृत्स्नधातुव्याख्याने मृजुष् शुद्धौ इति धातुं पठित्वा मार्ष्टि इति रूपमपठत्। अत्र मूलधात्वोः (मृजूष् – मृजुष्) ईषद्भेदो प्रतीयते। तेन मृजूष् धातोः **स्वरतिसूतिसूयतिधूञूदितो वा**[3] इति सूत्रेण वलाद्यार्धधातुकस्य इड्विकल्प इति तत्कार्याणि च प्रवर्तन्ते। तथा **उदितो वा**[4] इति सूत्रेण क्त्वायाम् इड्विकल्प इति तत्कार्याणि भवन्ति।

**2.44. आसु उपवेशने - आस्ते=उपविशति।** **2.11 आस उपवेशने - आस्ते।**

पाणिनीयधातुपाठे आस उपवेशने इति धातुना आस्ते इति रूपं भवति।
काशकृत्स्नधातुव्याख्याने आसु उपवेशने इति धातुं पठित्वा आस्ते इति रूपमपठत्। अत्र मूलधात्वोः (आस –आसु) उकारानुबन्धे ईषद्भेदो प्रतीयते। तेन **उदितो वा**[5] इति सूत्रेण क्त्वायाम् इड्विकल्प इति कार्याणि भवन्ति।

**2.49.सिजि अव्यक्ते शब्दे–सिङ्त्ते(सिङ्क्ते)=ध्वनिं करोति। 2.19शिजि अव्यक्ते शब्दे–शिङ्क्ते।**

पाणिनीयधातुपाठे शिजि अव्यक्ते शब्दे इति धातुना शिङ्क्ते इति रूपं भवति। काशकृत्स्नधातुव्याख्याने तु सिजि अव्यक्ते शब्दे इति धातुं पठित्वा सिङ्क्ते इति रूपमपठत्। अत्र प्रथममन्यं वर्तमानकालिकरूपं दृश्यते, तत्प्रसङ्गानुसारं संशोध्य टीकाकाराः साधुरूपं प्रादर्शयन्। अत्र धात्वर्थनिर्देशः समानश्चेदपि मूलधात्वोः (शिजि – सिजि), वर्तमानकालिकरूपयोः(शिङ्क्ते – सिङ्क्ते) भेदः दृश्यते।

**2.48. णिजि शुद्धौ –निङ्त्ते(निङ्क्ते)=शोधति।** **2.18 णिजि शुद्धौ - निङ्क्ते।**

**2.50. वृजी वर्जने =वृङ्त्ते(वृक्ते)=त्यजति।** **2.22 वृजी वर्जने – वृक्ते ।**

**2.51. पृजी सम्पर्के – पृङ्त्ते(पृक्ते)=मिलति।** **2.21 पृजि सम्पर्चने – पृक्ते।**

---

3 अष्टा.7.2.44

4 अष्टा.7.2.56

5 अष्टा.7.2.56

एतेषां धातूनां मूलधात्वर्थनिर्देशः, वर्तमानकालिकरूपञ्च समानमेव। किन्तु काशकृत्स्नधातुव्याख्याने प्रथममन्यानि वर्तमानकालिकरूपाणि दृश्यन्ते, तानि प्रसङ्गानुसारं संशोध्य टीकाकाराः साधुरूपाणि प्रादर्शयन्। पृजी सम्पर्के – पृजि सम्पर्चने अस्मिन् भेदो
विलोक्यते धात्वर्थनिर्देशे ।

**2.52 .षूञ् प्राणिगर्भविमोचने - सूते=गर्भं मुञ्चति। 2.25 षूङ् प्राणिगर्भविमोचने - सूते।**

पाणिनीयधातुपाठे षूङ् प्राणिगर्भविमोचने इति धातुना सूते इति रूपं भवति। काशकृत्स्नधातुव्याख्याने षूञ् प्राणिगर्भविमोचने इति धातुमुक्त्वा सूते इति रूपमवदत्। अत्र मूलधातोः (षूङ् – षूञ्) अनुबन्धवर्णे भेदः दृश्यते।

**2.57 . हुङ् अपनयने - हूते=त्यजति। 2.76 ह्नुङ् अपनयने – ह्नुते।**

पाणिनीयधातुपाठे ह्नुङ् अपनयने इति धातुना ह्नुते इति रूपं भवति। काशकृत्स्नधातुव्याख्याने हुङ् अपनयने इति धातुं पठित्वा हूते इति रूपमपठत्। अत्र टीकायामुच्यते – "अपपाठोऽयं प्रतीयते, तथैवोदाहरणेष्वपि। अत्र ह्नुङ् इति शुद्धपाठः।
कातन्त्रोऽपि इत्येव ह्नुङ् पठ्यते"[6] इति।

**2.62 . उर्णुञ् आच्छादने – ऊर्णोति,ऊर्णुते,ऊर्णीते=वयति।**

**2.34 ऊर्णुञ् आच्छादने- ऊर्णोति,ऊर्णौति, ऊर्णुते।**

पाणिनीयधातुपाठे ऊर्णुञ् आच्छादने इति धातुना ऊर्णोति, ऊर्णौति, ऊर्णुते इति रूपत्रयं भवति। ऊर्णोति इति परस्मैपदिनि, ऊर्णुते इति आत्मनेपदिनि। ऊर्णौति इति तु **ऊर्णोतेर्विभाषा**[7] इति सूत्रेण विकल्पेन वृद्ध्या सिद्ध्यति। काशकृत्स्नधातुव्याख्याने ऊर्णुञ् आच्छादने इति धातुं पठित्वा ऊर्णोति, ऊर्णुते, ऊर्णीते इति रूपत्रयमपठत्। अत्र **तनादेरु**[8] इति सूत्रेण यन् विकरणो भवतीत्युक्तं टीकायाम्। तत्रैव युधिष्ठिरमीमांसकाः पादटिप्पण्यां वदति – "अदादिगणस्थेषु धातुषु **तनादेरुः** इत्यस्य कथं प्रवृत्तिः? एवम् शूची अभिषवे[9] इत्यत्रापि **दिवादेर्यन्** इत्यवदत् वयं तु पश्यामः यथा वेदे क्वचित् द्विविकरणता, त्रिविकरणता दृश्यते तथैव प्राक् लोकभाषायामपि क्वचित्की प्रवत्तिरासीत्। तस्यैवावशेषोऽत्र काशकृत्स्नधातुपाठ उपलभ्यते।"[10] इति। तथा ऊर्णीते इति विषये तु ईकारागमः कथमिति न ज्ञापितः वृत्तिकृता इत्युक्तम्।

**2.63 . ष्टूञ् स्तुतौ – स्तौति,स्तवीते, स्तुते =प्रशंसति।**

---

6 का.धा.व्या.पृ–127

7 अष्टा.7.3.90

8 का.व्या.सू–73

9 का.धा.व्या.भ्वा.ग–1.230

10 का.धा.व्या.पृ–31

**2.38 ष्टुञ् स्तुतौ - स्तौति,स्तुवीति।**

**स्तुते,स्तवीते।**

पाणिनीयधातुपाठे ष्टुञ् स्तुतौ इति धातुना स्तौति,स्तुवीति - स्तुते,स्तवीते इति रूपाणि भवन्ति। **तुरुस्तुशम्यमः सार्वधातुके** [11] इति सूत्रेण सार्वधातुकस्य हलादेः तिङः ईट् वा स्यात्। तेन स्तुवीति, स्तवीते इति रूपे सम्पद्येते। काशकृत्स्नधातुव्याख्याने ष्टूञ् स्तुतौ इति धातुं पठित्वा स्तौति,स्तवीते, स्तुते इति रूपाण्यपठन्। अत्र मूलधात्वोः(ष्टुञ् - ष्टूञ्) भेदः दृश्यते। काशकृत्स्नधातुव्याख्याने ईडागमसहितपरस्मैपदिरूपं न प्रदर्शितम्।

**2.65. हू दानादनयोः – जुहोति,जुहोते=ददाति,गृह्णाति।** **3.1 हु दानादनयोः – जुहोति।**

पाणिनीयधातुपाठे हु दानादनयोः इति धातुना जुहोति इति रूपं भवति। अत्र **जुहोत्यादिभ्यः श्लुः** इति शपः श्लुः, तस्य लुक्, **श्लौ** [12] इति सूत्रेण धातोः द्वित्वं ततः चुत्वं गुणश्च। काशकृत्स्नधातुव्याख्याने हू दानादनयोः इति धातुं पठित्वा जुहोति,जुहोते इति रूपद्वयमपठत्। अत्र टीकायामुच्यते – **ह्वादेर्द्विः**[13] इति सूत्रेण हू इत्यादीनां द्विर्भवति। **कवर्गहकारयोश्चवर्गः**[14] इति सूत्रेण कवर्गस्य हकारस्य च चवर्गादिशो भवति। **पूर्वोऽभ्यासः**[15] इति सूत्रेण द्विर्भावे पूर्वोऽभ्याससंज्ञो भवति। **द्वयमभ्यस्तम्**[16] इति सूत्रेण द्विर्भावे द्वितीयम् अभ्यस्तसंज्ञं भवति। **अभ्यासस्य धुटां तृतीयाः प्रथमाः**[17] इति सूत्रेण अभ्यासस्यय धुटां (अन्तस्थानुनासिकवर्जितानां व्यञ्जनानां) स्थाने तृतीयाः प्रथमाश्च भवन्ति इति प्रकारेण जुहोति रूपं प्रवर्तते। जुहुते इत्यात्मनेपदरूपं तु चिन्त्यमित्युक्तम्। हू इति धातुविषये अत्र हु इत्येव शुद्धः पाठो द्रष्टव्यः, जुहुते इत्यत्र ह्रस्वोकारस्य वृत्तिकृता निर्देशात्[18]।

**2.66. ञभी भये – बिभेति,बिभेते=उद्विजते।** **3.2 ञिभी भये – बिभेति।**

पाणिनीयधातुपाठे ञिभी भये इति धातुना बिभेति इति रूपं भवति। काशकृत्स्नधातुव्याख्याने ञभी भये इति धातुं पठित्वा बिभेति,बिभेते इति रूपद्वयमपठत्। अत्र टीकायामुच्यते – "बिभेते इत्यात्मनेपदरूपं तु चिन्त्यमित्युक्तम्। ञिभी इति युक्तः पाठः"[19] इति।

---

11 अष्टा.7.3.95

12 अष्टा.2.4.75

13 का.व्या.सू.75

14 का.व्या.सू.76

15 का.व्या.सू.77

16 का.व्या.सू.78

17 का.व्या.सू.79

18 का.ध.व्या.पृ–129

19 का.ध.व्या.पृ–129

**2.74. कित ज्ञाने – चिकेत्ति=जानाति।** **3.21 कि ज्ञाने – चिकेति।**

पाणिनीयधातुपाठे कि ज्ञाने इति धातुना चिकेति इति रूपं भवति। काशकृत्स्नधातुव्याख्याने कित ज्ञाने इति धातुं पठित्वा चिकेत्ति इति रूपमपठत्। अत्र धात्वर्थनिर्देशः समानश्चेदपि मूलधात्वोः(कि – कित), वर्तमानकालिकरूपयोः(चिकेति – चिकेत्ति) भेदः दृश्यते।

**2.79. णिजिर् शौचशोषणयोः – नेनेक्ति,नेनिङ्ते(नेनिक्ते) =दुःखितो भवति।**

**3.12 णिजिर् शौचपोषणयोः- नेनेक्ति, नेनिक्ते।**

**2.80. विजिर् पृथग्भावे –वेवेक्ति,वेविङ्ते(वेविक्ते) =पृथग्भवति।**

**3.13 विजिर् पृथग्भावे - वेवेक्ति वेविक्ते।**

एतयोः धात्वोः मूलधात्वर्थनिर्देशः, वर्तमानकालिकरूपञ्च समानमेव। किन्तु काशकृत्स्नधातुव्याख्याने प्रथममन्ये वर्तमानकालिकरूपे दृश्येते, ते प्रसङ्गानुसारं संशोध्य टीकाकाराः साधुरूपे (नेनिङ्ते–नेनिक्ते), (वेविङ्ते–वेविक्ते) प्रादर्शयन्। टीकायामुच्यते – निनिक्ते इति साधु। एवमुत्तरसूत्रयोरपि द्रष्टव्यम्[20]।

**2.81. विषृ व्याप्तौ – वेवेष्टि,वेवीष्टे(वेविष्टे) =व्याप्नोति,आवृणोति।**

**3.14 विषॢ व्याप्तौ – वेवेष्टि,वेविष्टे।**

पाणिनीयधातुपाठे विषॢ व्याप्तौ इति धातुना वेवेष्टि,वेविष्टे इति रूपद्वयं भवति। काशकृत्स्नधातुव्याख्याने विषृ व्याप्तौ इति धातुं पठित्वा वेवेष्टि,वेविष्टे इति रूपद्वयमपठत्। अत्र प्रथममन्यं वर्तमानकालिकरूपं दृश्यते, तत्प्रसङ्गानुसारं संशोध्य टीकाकाराः साधुरूपं (वेवीष्टे–वेविष्टे) प्रादर्शयन्। धात्वोरनुबन्धवर्णे (विषॢ– विषृ) भेदो परिदृश्यते।

**2.84.माङ् माने शब्दे च - मीमांसते=परिमापयति। 3.7 माङ् माने शब्दे च – मिमीते।**

पाणिनीयधातुपाठे माङ् माने शब्दे च इति धातुना मिमीते इति रूपं भवति। काशकृत्स्नधातुव्याख्याने माङ् माने शब्दे च इति धातुं पठित्वा मीमांसते इति रूपमपठत्।
अत्र वर्तमानकालिकरूपे भेद आलोक्यते।

**2. केवलकाशकृत्स्नीयाः अदादिजुहोत्यादिगणधातवः**

**2.1. अदादिगणः**

**2.37.चाकशृ दीप्तौ** - काशकृत्स्नधातुव्याख्याने चाकशृ दीप्तौ इति धातुं पठित्वा चाकष्टि इति रूपमदात्।
अस्य प्रकाशते इत्यर्थो दत्तः। तथा व्याख्यायां चाकशन्, चाकशकः=प्रकाशकः, चाक्यः, चाकष्टम्, चाकशनम्, चाकशनीयम्, चाकष्टव्यम् चाकशम्, चाकश्यम् इत्येते सप्त प्रकाशेऽर्थे इति निर्दिष्टाः[21]।

---

20 का.ध.व्या.पृ–132

**2.41. ईळ स्तुतौ** - काशकृत्स्नधातुव्याख्याने ईळ स्तुतौ इति धातुं पठित्वा ईळते इति रूपमपठत्। अस्य प्रशंसति इत्यर्थो प्रदत्तः। तथा व्याख्यायां ईळा, ईळनम्, ईळनीयम्, ईळयम्, ऐळयम्, ईळिः=काष्ठपर्णाभ्यां निर्मितः क्षेत्रप्राकारः, ईळिका इत्येते सप्त प्रशंसायामर्थे[22] इति निर्दिष्टाः। पाणिनीयकाशकृत्स्नधातुपाठयोः अदादिजुहोत्यादिगणयोः ये च अवशिष्टाः धातवः सन्ति ते सर्वे मूलधात्वर्थनिर्देशवर्तमानकालिकरूपदृष्ट्या समानास्सन्ति।

**उपसंहारः-** पाणिनीयकाशकृत्स्नधातुपाठयोः अदादिजुहोत्यादिगणधातूनां तुलनात्र विहिता। आदौ अदादिजुहोत्यादिगणधातुनां तुलनां कृत्वा ईषत्समानाः धातवः इति विभज्य तत्रस्थानां धातूनां मूलधात्वर्थनिर्देशवर्तमानकालिकरूपेषु भेदाः स्पष्टीकृताः। ततः परं केवलं काशकृत्स्नधातुपाठे एव पठिताः धातवः काशकृत्स्नधातुव्याख्यानुगुणं व्याख्याताः। अवशिष्टाः धातवः मूलधात्वर्थनिर्देशवर्तमानकालिकरूपदृष्ट्या समानास्सन्ति। एवं रीत्या पाणिनीयकाशकृत्स्नधातुपाठयोः अदादिजुहोत्यादिगणधातूनां तुलना यथामति कृता।

।। इति शम्।।

**सन्दर्भग्रन्थसूची**


1. संस्कृत व्याकरणशास्त्र का इतिहास, युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट, 1984.
2. (पाणिनिमुनिप्रणीता) अष्टाध्यायी, पण्डित ब्रह्मदत्त जिज्ञासु, रामलाल कपूर ट्रस्ट, 2009.
3. काशकृत्स्नधातुव्याख्यानम्, युधिष्ठिर मीमांसकः, भारतीय प्राच्यविद्या प्रतिष्ठानम्, 1887.
4. काशकृत्स्नव्याकरणम्, युधिष्ठिर मीमांसकः, भारतीय प्राच्यविद्या प्रतिष्ठानम्, 1887.
5. क्षीरतरङ्गिनी(पाणिनीयधातुपाठस्य पश्चिमोत्तरपाठस्य व्याख्या), युधिष्ठिर मीमांसक, रामलाल कपूर ट्रस्ट, 2006.
6. बृहद्धातुकुसुमाकरः, हरेकान्त मिश्रः, चौखाम्बा संस्कृत प्रतिष्ठान, 2011.
7. (महामुनि-पाणिनिप्रणीतः) धातुपाठः, नरेश झा, चौखाम्बा संस्कृत प्रतिष्ठान, 2008.


21 का.धा.व्या.पृ-124-125

22 का.धा.व्या.पृ-125